बप्फो = बाष्पः (ऊष्मा)
भरहो, भरओ=भरतः
मोहो, मऊहो=मयूखः
मन्तू, मण्णू=मन्युः
मिच्चू, मच्चू = मृत्युः
मिअङ्को, मअङ्को=मृगाङ्कः
मंजारो, मज्जारो=मार्जारः
मुक्को, मुत्तो=मुक्तः
मेज्जो, मेओ=मेयः
रग्गो, रत्तो=रक्तः
रुद्रो, रुद्दो=रूद्रः
णगूलो, लगूलो=लाङ्गूलः
वढलो, वढरो=वठरः (धृष्टः)
वासओ, वरिसओ=वर्षजः
बिञ्चुओ, विछिओ=वृश्चिकः
विट्ठो, वुट्ठो=वृष्टः
वुड्ढो, वुद्धो=वृद्धः

पुव्वण्हो, पूवाण्हो=पूर्वाह्णः
पाइक्को, पआइ=पदातिः
बुन्दारओ, वन्दारओ=बृन्दारकः

बाहो=बाष्पः (अश्रु)
बम्हणो, बाह्मणो=ब्राह्मणः
मोरो, मऊरो=मयूरः
मणहरो, मणोहरो=मनोहर.
मज्झण्णो, मज्झण्हो=मध्याह्नः
भिअङ्गो, मुअङ्गो=मृदङ्गः
मंसलो, मासलो=मांसलः
मुसलो, मूसलो=मुसलः
मुरुहो, मुक्खो=मूर्खः
जहुट्ठिलो, जहिट्ठिलो=युधिष्ठिरः
लुक्को, लुग्गो=रुग्णः
हलुओ, लहुओ=लघुकः
णोहलो, लोहलो=लोहलः
वणस्सई, वणप्फई=वनस्पतिः
वंको, वङ्को=वक्रः
उसहो, वसहो=वृषभः
वच्छो, रुक्खो=वृक्षः
विसडो, विसमो = विषमः

विब्भलो, विह्भलो =
विहलो विह्वल:
वेडिसो, वेअसो=वेतस:
वेसंपाअणो, वइसंपाअणो=
वैशंपायन:
सण्हो, लण्हो=श्लक्ष्ण:

सढिलो, सिढिलो=शिथिल:
सुक्को, सुङ्गो=शुल्क:
सय्हो, सज्झो=सह्य:
संघारो, संहारो=संहार:
सारिच्छो, सरिच्छो=सदृक्ष:
खंभो, तंबो=स्तम्भ:

थवो, तवो=स्तव:
सिविणो, सिमिणो=स्वप्न:
थाणू=स्थाणु: (हर.)
सूहवो, सुहओ=सुभग:
सुण्णाणो, सुज्जाणो=सुज्ञान:
थुल्लो, थूलो, थोरो=स्थूल.
सणेहो, णेहो=स्नेह:
खेडओ, स्फेटक:=क्ष्वेडकश्च
दहो, द्रहो=हृद:
हूणो, हीणो=हीन:
खणो=क्षण: (काल:)

वाउल्लो, वाउलो=व्याकुल:
विहीणो, विहूणो=विहीन:

सक्को, सत्तो=शक्त:
सालाहणो, सालवाहणो=
शातवाहन:
सीभरो, सीहरो, सीअरो=शीकर.
सोक्खो, सोक्को=शुष्क:
सजणो, सज्जणो=सज्जन:
खंदो, कदो=स्कन्द:
सव्वज्जो, सव्वण्णू=सर्वज्ञ:
थंभो, ठभो=स्तम्भ. (सात्विकभाव:)
सरो, ईसरो=स्मर:
खाणू खण्णू=स्थाणु. (शङ्कु:)
सिणिद्धो, सणिद्धो, णिद्धो=स्निग्ध:
सोमारो, सुउमारो=सुकुमार:
सुण्हो, सोण्हो, सण्हो=सूक्ष्म:
थूणो, थोणो=स्थूण
थूणो, थेणो=स्तेन:
हीरो, हरो=हर:
हालिओ, हलिओ=हालिक:
छणो=क्षण: (उत्सव:)

### अथ अजन्तस्त्रीलिङ्गविशेषा:

आहिआई, अहिआई=अभिजाति: लावू, अलावू=अलबू:

| | |
|---|---|
| अज्जू=आर्या (श्वश्रू) | अज्जा = आर्या (पूज्या) |
| ओलि=आलि: (पङ्क्त:) | रिड्ढी, इड्ढी, उद्धी, इद्धी=ऋद्धि: |
| आली=आलि: (सखी) | |
| करली=कदली (मृगविशेष:) | कअली=कदली (द्रुम:) |
| कसा, कासा=कृशा | कोहल्ली, कोहण्णी=कूश्माण्डी |
| गऊ, गई, गाई=गौ: | गिट्ठी, गिण्ठी=गृष्टि: (धेनु:) |
| चनिडा, चवेढा=चपेटा | चन्दिमा, चन्द्रिमा=चन्द्रिका |
| छाहा, छाई छाआ=छाया | जिब्भा, जीहा=जीह्वा |
| दूआ, दुहिआ=दुहिता | दुग्गाई, दुग्गादेई=दुर्गादेवी |
| धत्ती, धारी, धाई=धात्री | दिही, धिई=धृति: |
| णीमी, णीवी=नीवी | पासिद्धि, पसिद्धी=प्रसिद्धि: |
| पाडिसिद्धी, पडिसिद्धी= प्रतिसिद्धि: | पाहुडी, पहुडी=प्रभृति: |
| पुहई, पुढई=पृथिवी | पिच्छी=पृथ्वी (भू:) |
| पहुई=पृथ्वी (गुर्वी) | बहिणी, भइणी=भगिनी |
| भुमआ, भमआ=भ्रू: | मणसिला, माणसिला=मनश्शिला |
| मणसिणी, माणंसिणी= मनस्विनी | रत्ती, राई=रात्रि: |
| रुप्पिणी, रुत्थिणी, रुम्मिणी= रुक्मिणी | वेल्ली, वल्ली=वल्ली |
| वसही, वसई=वसति: | विलआ, वणिआ=वनिता |
| विअणा, वेअणा=वेदना | सड्ढा, सद्धा=श्रद्धा |
| सिप्पी, सुत्ती, सोत्ती=शुक्ति: | समिद्धी, सामिद्धी=समृद्धि: |
| सुण्हा=सास्ना | सिरी, इत्थी=स्त्री |
| छिरा, सिरा=सिरा | सुण्हा, सुसा=स्नुषा |
| थूणा, थोणा = स्थूणा | हरडई, हरअई=हरीतकी |
| हलद्दी, हलद्दा, हलद्री, हलद्रा= हरिद्रा | छमा, क्षमा=क्षमा च |
| खमा=सहनम् | |

## अथ अजन्तनपुंसकलिङ्गा:

अड्ढम्, अद्धम्=अर्थम्

अण्णण्णम्, अण्णोण्णम्=अन्योन्यम्

आरण्णम्, रण्णम्=अरण्यम्

अल्लम्, उल्लम्, ओल्लम्, अद्दम्; उद्दम्, ओद्दम्, अद्रम्, उद्रम्, ओद्रम्=आर्द्रम्

अच्छअरम्, अच्छरिअम्, अच्छरिज्जम्=आश्चर्यम्

अङ्गुअम्, इङ्गुअम्=इङ्गुदम्

ओहलम्, उऊहलम्=उदूखलम्

उत्तरीअम्, उत्तरिज्जम्=उत्तरीयम्

उद्धम्, उब्भम्=ऊर्ध्वम्

उणम्, रिणम्=ऋणम्

ओसढम्, ओसहम्=औषधम्

कालासम्,कालाअसम्=कालायसम्

किसलम्, किसलअम्=किसलयम्

कोहल्लम्, कोहलम्, कोउहल्लम्, कोउहलम्, कुऊहल्लम्, कुऊहलम्=कुतूहलम्

चिन्धम्, चिण्हम्, इन्धम्, इण्हम्=चिह्नम्

चेइअम्, चेइइअम, चेइत्तम्, चेअम्=चैत्यम् (बौद्धालय:)

जढरम्, जढलम्=जठरम्

जीअम्, जीविअम्=जीवितम्

तलविंटम्, तालविंटम्, तलवेंटम्, तालवेंटम्=तालवृन्तम्

तिम्मम्, तिग्गम्=तिग्मम्

तूहम्, तित्थम्=तीर्थम्

दुअल्लम्, दुऊलम्=दुकूलम्

दूहम्, दुक्खम्=दुःखम्

देउलम्, देवउलम्=देवकुलम्

देरम्, दारम्, बारम्, वेरम्, दुआरम्, दुएरम, दुवेरम्, दुवारम्=द्वारम्

धीरम्, धिज्जम्=धैर्यम्

ओमल्लम्, णिम्मल्लम्=
निर्माल्यम्
पत्तलम्, पत्तम्=पत्रम्
पलिअम्, पलिलम्=पलितम्
पावडणम्, पाअवडणम्=
पादपतनम्
पिट्ठम्, पट्ठम्=पृष्ठम्
पिण्डम्, पेण्डम्=पिण्डम्
भाणम्, भाअणम्=भाजनम्
मसिणम्, मसणम्=मसृणम्
मइलम्, मलिणम्=मलिनम्
माउक्कम्, मउक्कम्, माउअम्,
मउअम्=मृदुकम्
मीसम्, मीसालिअम् = मिश्रम्
णिडालम्, णडालम्=ललाटम्
णङ्गलम्, लङ्गलम्=लाङ्गलम्
विंटम्, वेंटम्=वृन्तम्
वेरुलिअम्, वेरुज्जम्=वैडूर्यम्
सिङ्गम्, सङ्गम्=शृङ्गम्
सिन्दूरम्, सेन्दूरम्=सिन्दूरम्
सिण्णम्, सेण्णम्, सइण्णम्=
सैन्यम्
हिअम्, हिअअम् = हृदयम्

णिउरम्, णेउरम्, णूउरम्=नूपरम्
पल्लाणम, पडाणम्=पर्याणम्
पउमम्, पोम्मम्=पद्मम्
पावीढम्, पाअवीढम्=पादपीठम्
पाणिअम्, पाणीआम्=पानीयम्
पुढुमम्, पढुमम्, पुढमम्, पढमम्=
प्रथमम्
पीअम्, पीअलम्=पीतम्
भोणम्, भोअणम्=भोजनम्
महुअम्, महूअम्=मधूकम्
मासम्, मंसम्=मांसम्
माउक्कम्, मउक्कम्, माउत्तणम्,
मउत्तणम, माउत्तम्, मउत्तम्,
माइमा, मइमा=मृत्वम्
राउलम्, राअउलम्=राजकुलम्
लोणम्, लवणम्=लवणम्
वइरम्, वज्जम्=वज्रम्
विजाणम्, विण्णाणम्=विज्ञानम्
वारणम्, वाअरणम्=व्याकरणम्
सामच्छम्, सामत्थम्=सामर्थ्यम्
सररुहम्, सरोरुहम्=सरोरुहम्
ठीणम्, थीणम्, थिण्णम्=स्त्यानम्

## हलन्तपुल्लिङ्गाः ।

आरहन्तो, अरिहन्तो, अरहन्तो,
अरुहमाणो, अरिहमाणो,
अरुहो, अरिहो, अरहो=अर्हन्
अप्पो, अत्तो, अप्पाणो अत्ताणो=
आत्मा
भवन्तो, भवो=भवान्
मुण्ढा, मुन्धा=नकारान्तवत्
सक्खिणो, सक्खी=साक्षी
अप्पा, अत्ता, आदा=नकारान्तवत्
तिरच्छी, तिरो=तिर्यक्
महन्तो, महो=महान्
मुण्ढाणो, मुन्धाण =मूर्धा

## हलन्तस्त्रीलिङ्गाः

आसीसा, असिआ=आशीः
पडिवआ, पाडिवआ = प्रतिपत्
अच्छरसा, अच्छरआ=अप्सराः
विज्जुला, विज्जू=विद्युत्

## हलन्तनपुंसकलिङ्गाः

छउमो, छम्मो=छद्म
भप्पो, भस्सो=भस्म
जम्मणो, जम्मो=जन्म

एषामकारान्तवत् रूपम्

इति शब्दविशेषाः

—— 0 ——

दकारान्तो युष्मच्छब्दस्त्रिलिङ्गेऽपि समानः

| | | | |
|---|---|---|---|
| प्र. ए. | तुवम्, तुम्, तुमम्, तुह, तम् । | प्र. ब. | भे, तुब्भे, तुय्हे, उय्हे, तुब्भ, तम्हे, तुज्झ, तुम्ह, तुज्झ । |
| द्वि. ए. | तुमे, तुए, तुवम्, तुम्, तुमम्, तुह, तम् । | द्वि. ब | वो, भे, तुय्हे, तुम्हे, तुज्झे, उय्हे, तुब्भ, तुम्ह, तुज्झ, तुब्भे । |
| तृ. ए | भे, ते, दे दि, तुमम्, तुमइ, तुमए, तुइ, तुए, तुमाइ, तुमे । | तृ. ए. | भे, तुब्भेहि, तम्हे ह, तुज्झेहि, उब्भहि, उम्हेहि, उज्झहि, उय्हेहि, तुय्हेहि । |
| पं. ए. | तुब्भ, तुम्ह, तुज्झ, तुहित्तो, तुय्ह, तईहिन्तो, तइत्तो, तईओ, तईउ, तुवाहिन्तो, तुवत्तो, तुवाओ, तुवाउ, तुवाहि, तुवा, तुमाहिन्तो, तुमत्तो, तुमाओ, तुमाउ, तुमा, तुमाहि, तुहाहिन्तो, तुहत्तो, तुहाओ, तुहाउ, तुहा, तुहाहि, तुब्भाहिन्तो, तुब्भत्तो, तुब्भाओ, तुब्भाउ, तुब्भा, | पं. ब. | उम्हेहिन्तो, उम्हाहिन्तो, उम्हेसुन्तो, उम्हासुन्तो, उम्हेहि, उम्हाहि, उम्हत्तो, उम्हाओ, उम्हाउ, उयहाहिन्तो, उय्हेहिन्तो, उय्हासुन्तो, उय्हेसुन्तो, उय्हाहि, उय्हेहि, उय्हत्तो, उय्हाओ, उय्हाउ, तुय्हेहिन्तो, तुय्हाहिन्तो, तुय्हेसुन्तो, तुय्हासुन्तो, तुयहेहि, तुय्हाहि, तुय्हत्तो, तुय्हाओ, |

| | | | |
|---|---|---|---|
| | तुब्भाहि· तुम्हाहिन्तो, तुम्हत्तो, तुम्हाओ, तुम्हाउ, तुम्हा, तुम्हाहि, तुज्झाहिन्तो, तुज्झत्तो, तुज्झाओ, तुज्झाउ, तुज्झा, तुज्झाहि । | | तय्हाउ, तुब्भाहिन्तो, तुब्भेहिन्तो, तुब्भासुन्तो, तुब्भेसुन्तो, तुब्भाहि, तुब्भेहि, तुब्भत्तो, तुब्भाओ, तुब्भाउ, तुम्हाहिन्तो, तुम्हेहिन्तो· तुम्हासुन्तो, तुम्हेसुन्तो, तुम्हाहि, तुम्हेहि, तुम्हत्तो, तुम्हाओ, तुम्हाउ, तुज्झाहिंतो, तुज्झेहिन्तो, तुज्झासुन्तो, तुज्झेसुन्तो, तुज्झाहि, तुज्झेहि, तुज्झत्तो, तुज्झाओ, तुज्झाउ । |
| ष ए. | तब्भ, तुज्झ, उब्भ, उम्ह, उज्झ, उय्ह, तुय्ह, तइ, तुहम्, तुह, तुम्ह, तुव, तुम, तुमे, तुमाइ, तुमो, दे, ते, दि, तुइ, तुए । | ष. ब. | तुम्हाणम्, तुम्हाण, तुज्झाणम्, तुज्झाण, तुब्भाणम्, तुब्भाण, तुमाणम्, तुमाण, तुवाणम्, तुवाण, तुहाणम्, तुहाण, तुब्भम्, तुम्हम्, तुज्झम्, तुब्भ, तुम्ह, तुज्झ, वो, भे, तु । |
| स. ए. | तुमए, तुइ, तुए, तुमाइ, तुमे, | स. ब. | तुवेसुम्, तुवेसु, तुमेसुम्, तुमेसु, |

| | |
|---|---|
| तुमम्मि, तुवत्थ, | तुहेसुम्, तुहेसु, |
| तुवस्सिम्, तुवम्मि, | तुब्भेसुम्, तुब्भेसु, |
| तुमत्थ, तुमस्सिम्, | तुम्हेसुम्, तुम्हेसु, |
| तुमम्मि, तुहत्थ, | तुज्झेसुम्, तुज्झेसु, |
| तुहस्सिम्, तुहम्मि, | तूसुम्, तूसु । |
| तुब्भत्थ, तुब्भस्सिम्, | |
| तुब्भम्मि, तुम्हत्थ, | |
| तुम्हस्सिम्, तुम्हम्मि, | |
| तुज्झत्थ, तुज्झस्सिम्, | |
| तुज्झम्मि, तुवहिम्, | |
| तुमहिम्, तुहहिम्, | |
| तुब्भहिम्, तुम्हहिम्, | |
| तुज्झहिम् । | |

दकारान्तः पुल्लिङ्गः अस्मच्छब्दः

लिङ्गत्रयेऽपि समानः

| | | | |
|---|---|---|---|
| प्र. ए. | अम्हि, हम्, अहअम्, अहम्, अहम्मि, अम्मि । | प्र. ब. | मो, भे, वअम्, अम्हे, अम्हो, अम्ह । |
| द्वि. ए. | मम्, णे, णम्, म्मि, मिमम्, ममम्, अम्मि, अहम्, मम्ह, अम्ह । | द्वि. ब. | अम्हे, अम्हो, अम्ह । |
| तृ. ए. | मि, मइ, मिमाइ, मए, मे, ममम्, णं, मआइ, ममए । | तृ. ब. | णे, अम्हेहिम्, अम्हेहि, अम्हेहिँ, अम्हाहिम्, अम्हाहि, अम्हाहिँ, अम्हे, अम्ह । |

| | | | |
|---|---|---|---|
| पं. ए. | मईहिन्तो, मइत्तो, | प. ब. | अम्हाहिन्तो, |
| | मईओ, मईउ, | | अम्हेहिन्तो, |
| | ममाहिन्तो, ममत्तो, | | अम्हासुन्तो, |
| | ममाओ, ममाउ, | | अम्हेसुन्तो, |
| | ममा, ममाहि, | | अम्हाहि, अम्हेहि, |
| | महाहिन्तो, महत्तो, | | अम्हत्तो, अम्हाओ, |
| | महाओ, महाउ, महा, | | अम्हाउ, ममाहिन्तो, |
| | महाहि, मज्झाहिन्तो, | | ममेहिन्तो, ममा- |
| | मज्झत्तो, मज्झाओ, | | सुन्तो, ममेसुन्तो, |
| | मज्झाउ, मज्झा, | | ममाहि, ममेहि, |
| | मज्झाहि । | | ममत्तो, ममाओ, |
| | | | ममाउ । |
| ष. ए. | अम्हम्, मज्झम्, | ष. ब. | अम्हे, अम्हो, |
| | मज्झ, मइ, मह, | | अम्हाणम्, अम्हाण, |
| | महम्, मे, अम्ह, | | ममाणम्, ममाण, |
| | मम । | | महाणम्, महाण, |
| | | | मज्झाणम्, मज्झाण, |
| | | | मज्झ, अम्ह, अम्हम्, |
| | | | णे, णो । |
| स. ए. | मि, मइ, मिमाइ, | स. ब. | अम्हेसुम्, अम्हेसु, |
| | मए, मे, अम्हत्थ, | | अम्हासुम्, अम्हासु, |
| | अम्हस्सिम्, अम्हम्मि, | | अम्हसुम्, अम्हसु, |
| | अम्हहिम्, ममत्थ, | | ममेसुम्, ममेसु, |
| | ममस्सिम्, ममम्मि, | | ममासुम्, ममासु, |
| | ममहिम्, मज्झत्थ, | | ममसुम्, ममसु, |
| | मज्झवस्सम्, मज्झम्मि, | | मज्झेसुम्, मज्झेसु, |
| | मज्झहिम्, महत्थ, | | मज्झासुम्, मज्झासु, |

| | |
|---|---|
| महस्सिम्, महम्मि, | मज्झसुम्, मज्झसु, |
| महहिम्, अम्हे, ममे, | महेसुम्, महेसु, |
| मज्झे, महे, चिन्त्यमेतत् | महासुम्, महासु, |
| | महसुम्, महसु । |

—: इति शब्दरूपप्रकरणम् :—

अथ अव्ययानि उपयुक्तानि कानिचित्प्रदर्श्यन्ते ।

वले, णइ, चेअ, चिअ, च्चिअ, व्व=एवार्थे

किम्, किणो=किम्

मिव, पिव, विव, विअ, व्व, व, इव=इवार्थे

किर, इर, हिर, किल=किलार्थे

अम्हो, अब्भो, हू=आश्चर्ये

णवर, णवरि, णवरिअ=केवलम् अनन्तर च

मणअम्, मणिअम्, मणम्=मनाक्

चच्छे, पप्पे, दे=हे

अण, णाइम्, ण=नञार्थे

हु, भंदि, वणे, खु, वले=निश्चये

मणे=किस्वित्

सणिअम्=शनैः

अलाहि, हुंचच्छे=अलम्

माइ=मार्थे

ओ, अव=अव, अप

उ, ओ, उव=उप

ओ, उअ=उत

पाडिएक्कम, पाडिक्कम्, पच्चेअम्=प्रत्येकम्

अप्पणा, सअम्=स्वयम्

कइआ, काहे, काला, कआ=कदा

तइआ, ताहे, ताला, तआ=तदा

जइआ, जाहे, जाला, जआ = यदा
जा, जाव=यावत्
ता, ताव=तावत्
कहि, कत्थ, कह=कुत्र
दिट्ठिआ=दिष्ट्या
पुणो, पुणाइ, पुण=पुन:
णउ, णाइ, णउणा, णउण, णउणो=नपुन:
कओ, कदो, कत्तो, कुओ, कुदो=कुत: इत्यादि ।

इत्यव्ययप्रकरण्

अथ तद्धितान्ता: केचित्प्रदर्श्यन्ते ।

सिरिमन्तो=श्रीमान्
धणमणो=धनवान्
भत्तिवन्तो=भक्तिमान्
हणुमा = हनुमान्
दआलू=दयावान्
सद्धालो=श्रद्धावान्
गव्विरो=गर्ववान्
छाइल्लो=छायावान्
दप्पुल्लो=दर्पवान्
माणइन्तो=मानवान्

इत्याद्यूह्यम्

तेत्तिअम्, तित्तिअम्, तित्तिलम्, तेद्दहम्, ता, ताव=तावत्
एत्तिअम्, इत्तिअम्, इत्तिलम्, एद्दहम्=एतावत्
केत्तिअम्, कित्तिलम्, केद्दहम्=कियत्
एत्तिअम्, इत्तिलम्, एद्दहम्=इयत्
जेत्तिअम्, जित्तिअम्, जित्तिलम्, जेद्दहम्, जा, जाव=यावत्

वहिओ=पथिकः (पान्थः)
सव्वङ्गिओ=सर्वाङ्गीणः
अप्पणआम्=आत्मीयम्
जहि, जत्थ, जह=यत्र
एवं त्रलन्ताः
अम्हक्केरो, अम्हकेरो=अस्मदीयः
पारिक्कम्, पारिक्कम्, पारक्कम्, परक्कम्, पारकेरम्,
परकेरम्=परकीयम्, अयमेव विशेषः
राइक्कम्, राअक्कम्, राअकेरम्=राजकीयम्
सामान्येन तुम्हकेर युष्मदीयमित्यादि ।
तुम्हेच्चेअम्=यौष्माकम्
अम्हच्चेअम्=अस्माकम्
चन्दव्व=चन्द्रवत् इत्यादि
पीणिमा, पीणत्तणम्=पीनत्वम् इत्यादि
सव्वदो, सव्वत्तो सव्वओ=सर्वतः इत्यादि
एक्कम्मि, एक्कसिअ, एक्कइअ, एक्कआ=एकदा इत्यादि
सअहुत्तो = शतकृत्वः इत्यादि
पुरिल्लम्=पुरोभवम्
अप्पुल्लम्=आत्मभवम् इत्यादि
लज्जिरो=लज्जाशीलः इत्यादि

इति तद्धितान्ताः

अथ कृदन्तविशेषाः

हसिअम्=हसितम्
पडिअम्=प्रतिष्ठितम्
जाअम्=जातम्
लूअम्=लुनम्
भूअम्=भूतम् इत्यादि ।

कारिअम्, काराविअम्=कारितम्
हासिअम्, हासाविआम्=हासितम् इत्यादि
होमाणो, होन्तो=भवन्
हसमाणो, हसन्तो, हसेमाणो, हसेन्तो=हसन् इत्यादि
विराअमाणो, विराअन्तो, विराएमाणो, विराएन्तो=
विराजमान:
हसई, हसेई, हसमाणी, हसेमाणी, हसन्ती, हसेन्ती,
हसमाणा, हसेमाणा, हसन्ता, हसेन्ता = हसन्ती
भजई, भजेई, भजमाणी, भजेमाणी, भजन्ती, भजेन्ती,
भजमाणा, भजेमाणा, भजन्ता, भजेन्ता=भजमाना
दट्ठुम्, दट्ठुआण, टट्ठूण, टट्ठुआणम्, दट्ठूणम्=दृष्ट्वा
घेत्तुम्, घेत्तुआण, घेत्तुआणम्, घत्तूण, घेत्तूणम्=गृहीत्वा
वोत्तुम्, वोत्तुआण, वोत्तुआणम्, वोत्तूण, वोत्तूणम्=उक्त्वा
मोत्तुम्, मोत्तुआण, मोत्तुआणम्, मोत्तूणम्, मोत्तूण=मुक्त्वा
रोत्तुम्, रोत्तुआण, रोत्तुआणम्, रोत्तूण, रोत्तूणम्=रुदित्वा
सोत्तुम्, सोत्तुआण, सोत्तुआणम्,
सोत्तूण, सोत्तूणम्, सुणिउम्, सुणेउम्, सुणिऊण,
सुणिऊणम्, सुणेऊण, सुणेऊणम्, सुणिउआण, सुणिउ-
आणम्, सुणेउआण, सुणेउआणम्=श्रुत्वा
भोत्तुम्, भोत्तुआण, भोत्तुआणम्, भोत्तूण, भोत्तूणम्=
भुक्त्वा
काउम्, काउआणम्, काउआण, काऊणम्, काऊण=कृत्वा
हसेहम्, हसिअम्, हसेअ, हसिअ, हसेऊण, हसेऊणम्,
हसिऊण, हसिऊणम्, हसिउआण, हसिउआणम्, हसेउआण,
हसेउआणम् = हसित्वा इत्यादि
दट्ठुम्=द्रष्टुम्
घेत्तुम्=गृहीतुम्
वोत्तुम्=वक्तुम्

मोत्तुम्=मोक्तुम्
रोत्तुम्=रोदितुम्
सोत्तुम्=श्रोतुम्
भोत्तुम्=भोक्तुम्
काउम्=कर्तुम्
हसेउम्, हसिउम्=हसितुम्
दट्ठव्वम्=द्रष्टव्यम्
घेत्तव्वम्=गृहीतव्यम्
वोत्तव्वम्=वक्तव्यम्
मोत्तव्वम्=मोक्तव्यम्
रोत्तव्वम्=रोदितव्यम्
सोत्तव्वम्=श्रोतव्यम्
भोत्तव्वम्=भोक्तव्यम्
काअव्वम्=कर्तव्यम्
हसेअव्वम्, हसिअव्वम्=हसितव्यम् इत्यादि
करणीओ, करणिज्जो = करणीयः इत्यादि ।

इति कृतन्दविशेषाः

इति प्राकृतभाषाया सुबन्तविभागः

— — 0 — —

## अथ प्राकृततिङन्तसामान्यप्रक्रिया

सू· लटस्तिप्ताविजेच् ।

लटः प्रथमपुरुषैकवचनयोस्तिप्तयोः प्रत्येकं इच्, एच् इति भवतः । अत्र लड्ग्रहणं लकारमात्रोपलक्षकम् । तेन लस्येत्यर्थः । होइ । भवति ।

सू· त्वनतः ।

अकारान्तवर्जितादजन्ताद्धातोरगागमो वा भवति । होअइ । भवति ।

सू· अतएवैच्से ।

प्रथमपुरुषस्यैकत्वे विहितो य एच् । मध्यमपुरुषस्यैकत्वे वक्ष्यमाणो यस्सेतावकारान्तादेव भवतः नान्यस्मात् । होअए । अत एवेति किम् । होइ ।

सू· लड्लृढोश्च जर्जारौ ।

लड्लृटोश्चकाराद्विध्यादिषु च सर्वत्र विहितस्य प्रत्ययस्य स्थाने जर्जारौ वा भवतः । रित्त्वात् द्वित्वम् । होज्ज, होज्जा । सर्वलकारेषु जर्जाराविति केचित् ।

सू मध्येचाजन्तात् ।

अजन्तात् धातोः प्रकृतिप्रत्ययोः मध्ये च जर्जारौ वा भवतः । लड्लृटोः विध्यादिषु च । होज्जइ । होज्जाइ इत्यादि ।

सू· झिझौन्तिन्तेइरे ।

लटः प्रथमपुरुषस्य बहुत्वे विहितयोः झिझयोः प्रत्येकं न्ति, न्ते, इरे इति त्रय आदेशा भवन्ति ।

होन्ति । होन्ते । होइरे । भवन्ति ।

सू· सिप्थास्सेसि ।

लटः मध्यमपुरुषैकवचनयोः सिप् थास् इत्येतयोः प्रत्येक से, सि, इत्येतौ भवतः । होअसि । होअसेइ । इत्यादि ।

सू· थध्वमित्थाहृचौ ।

लटः मध्यमपुरुषबहुवचनयोः थ ध्वम् इत्येतयोः प्रत्येकं इत्था, हच् इत्यादेशौ भवतः । होइत्था । होह इत्यादि ।

सू· मिर्मिबिटौ ।

उत्तमपुरुषैकवचनयोः मिप्, इट् इत्येतयोः प्रत्येकं मि इत्यादेशो भवति । होमि ।

सू· तुमौ ।

अदन्ताद्धातोरुत्तमपुरुषैकवचनादेशे मौ परे आत्वं तु भवति । होआमि । होअमि ।

सू· वालङ्लोट्छतृषु ।

एषु परेषु अत एत्वं वा स्यात् । होएमि । होएइ । इत्यादि ।

सू· मोममुमस्महिङ ।

उत्तमपुरुषबहुवचनयोः मस् महिङ इत्येतयोः मो म मु इति त्रय आदेशाः प्रत्येकं भवन्ति । होमो । होम । होमु इत्यादि ।

सू· मोममुष्विच्च ।

अकारान्ताद्धातोः मो, म, मु इत्येतेषु परेषु अत इत्वमात्वं च वा स्यात् । होइमो । होआमो । पक्षे । होअमो इत्यादि ।

सू· ज्जाज्जे ।

ज्जा, ज्ज इत्येतयोः परयोः अत एत्वं वा स्यात् । हेवेजा ।

हुवेज्ज । अ इत्येव होज्जा ।

सू· भूतार्थस्यसिहिअहि ।

भूतार्थे विहितो यो लुङादिप्रत्ययः तस्य स्थाने प्रत्येकं सि, हि, अ हि, इति त्रय आदेशा भवन्ति । स्वरान्तादेवायं विधिः । होसि । होहिअ । होहि . तिप्तयोरेवस्यादयः ।

सू· हलईअ ।

हलन्तात् परयोः भूतार्थकयोः तिप्तयोः ईअ इत्यादेशो भवति । हुवीअ । सर्वत्र बभूव । अभवत् अभूद्वा ।

सू· भविष्यति हिरादिः ।

भविष्यदर्थे विहितप्रत्यये परे तस्यैव हिरित्यादिः प्रयोक्तव्यः । होहिइ । इत्यादि । भविष्यति । भविता वा ।

सू· हासमिमोमुमे वा ।

भविष्यदर्थे विहितेषु मि, मो, मु, म इत्येतेषु परेषु हा र्सा इति वा प्रयोक्तव्यौ । पक्षे हिरपि । होहामि । होस्सामि इत्यादि । पक्षे होहिमि ।

सू· संम् ।

धातोः परतः भविष्यति काले मे स्थाने सं वा भवति । होहिस्सम् । पक्षे होहिमि ।

सू· हिस्साहिद्धामुमोमस्य ।

भविष्यति काले मु, मो, म एषां स्थाने हिस्सा, हिद्धा इति वा प्रयोक्तव्यौ । होहिस्सा । होहिद्धा । पक्षे होहिमु इत्यादि ।

सू· एच्च क्त्वा तुं तव्य भविष्यति ।

क्त्वा, तुं तव्येषु भविष्यत्कालविहिते च प्रत्यये परत: अत एत्वमित्वं च भवति । हुवेहिमि । हुविहिमि इत्यादि ।

सू. एकस्मिन् प्रथमादेर्विध्यादिषु दुसुमु ।

लिङ्लोटो: प्रथममध्यमोत्तमपुरुषैकवचनानां स्थाने क्रमात् दु सु मु इति भवन्ति । होदु । होसु । होमु इत्यादि ।

सू. बहोन्तुहमो ।

लिङ्लोटो. प्रथममध्यमोत्तमपुरुषबहुवचनानां स्थाने न्तु, ह, मो इति क्रमाद्भवन्ति । होन्तु । होह । होमो इत्यादि ।

सू. सोस्तुहि ।

विध्यादिषु सोर्मध्यमपुरुषैकवचनस्य स्थाने हि इत्यादेशो वा भवति । होहि । होसु इत्यादि ।

सू त्विज्जाल्लिङ: ।

लिङो जर्जाभ्यां पर: इकारो वा प्रयोक्तव्य: । होज्जइ । होज्जाइ इत्यादि ।

सू लुगिज्जहीज्जस्विज्जेत: ।

अदन्ताद्धातोलिङो मध्यमपुरुषैकवचनस्य स्थाने लुक् । इज्जहि । इज्जसु । इज्जेइ इति चत्वार: आदेशा: वा भवन्ति । हव । हविज्जिहि । हविज्जसु । हविज्जे । पक्षे हविसु इत्यादि ।

सू. माणन्तौल्चलृङ: ।

लृङ: माणन्त इत्यादेशौ सर्वत्र भवत: लित्वान्नित्यम् । चकाराज्जर्जारौ च । होमाण । होन्त । होज्ज । होज्जा इत्यादि ।

सू. योरेङ ।

धातोरिवर्णो वर्णयोरेदेतौ यथासङ्ख्यं भवतः । जेइ । जयति । सोऊण । श्रुत्वा इत्यादि ।

सू. उवर्णस्याव: ।

धातोरन्त्यस्य उवर्णस्य "अव"इत्यादेशो भवति । बवइ । ब्रूते ।

सू. रुषगेऽचोदिः ।

रुषादिष्वादेरचो दीर्घो भवति । रुष-रूसइ । शुष सूसइ । तुष-तूसइ । पुष पूसइ । शिष-सीसइ इत्यादि ।

सू. णोहश्चचिजिश्रुपूधूस्तुहुलूभ्यः ।

एभ्यः परो ण इत्यागमः स्यात् । तत्सन्नियोगेन दीर्घस्य ह्रस्वः । जिणइ । जयतीत्यादि ।

सू. अरऋः ।

धातोः ऋवर्णस्य अर इत्यादेशो भवति । मरइ । म्रियते इत्यादि ।

सू. छर्गमिष्यमासाम् ।

गम्, इष्, यम्, आस् एषामन्त्यस्य छकारः भवति । रित्वात् द्वित्वम् । गच्छइ । गच्छति इत्यादि ।

सू. छिदिभिदोन्थः ।

अनयोरन्त्यस्य न्थ इत्यादेशः स्यात् । छिन्थइ । छेत्ति । भिन्थइ । भेत्ति इत्यादि ।

सू. रुधोन्थम्भौ ।

अन्त्यस्येत्यनुवर्तते । रुन्थइ । रुम्भइ । रुन्धते ।

सू· आभूतभविष्यति च कृञः ।

भूतार्थे भविष्यदर्थे च प्रत्यये परे कृञः अन्त्यस्य आत्वं स्यात् । कासि इत्यादि । चकार । काहिइ । करिष्य-तीत्यादि ।

सू· नमोद्विजरुदां वः ।

एषामन्त्यस्य वः स्यात् । णवइ·नमति । उव्विवइ-उद्विजते । रुवइ-रोदिति ।

सू· चर्नृतिमदिव्रजाम् ।

अन्त्यस्येति वर्तते । णच्चइ नृत्यति इत्यादि ।

सू· युधबुधगृधक्रुधसिधमुहां च झझः ।

एषां रुधेश्चान्त्यस्य द्विरुक्तझकारः स्यात् । जुज्झइ । युध्यतीत्यादि ।

सू· जर्स्विदाम् ।

स्विदादीनां अन्त्यस्य जर्भवति । स्विद् । सिज्जइ । सम्पद् । सम्पज्जइ । खिद् । खिज्जइ इत्यादि ।

सू· ढः क्वथिपर्धाम् ।

अन्त्यस्य ढः स्यात् । वृधेर्वर्धतेश्चाविशेषेण ग्रहणम् । कड्ढइ । क्वथते । वड्ढइ । वर्धते ।

सू· वेष्टेः ।

अन्त्यस्य ढः स्यात् । वेढइ । वेष्टते ।

सू· खादधाविलुक् ।

अनयोरन्त्यस्य लुग्भवति । खाइ-खादति । धाइ धावति इत्यादि ।

सू· रस्सृजि ।

सृजधातोरन्त्य(स्य) रत्वं भवति । सरइ । सृजति ।

सू· डस्सीदपतो ।

अनयोरन्त्यस्य डत्वं भवति । सडइ-सीदति । पडइ-पतति ।

सू· शकगे ।

शकादिष्वन्त्यस्य द्वित्वं भवति । शक्नोति-सक्कइ । अट्टइ-अटति इत्यादि ।

सू· अरिर्वृषाम् ।

वृषादीनां ऋकारस्य अरिरित्यादेशः स्यात् । वरिसइ । वर्षतीत्यादि ।

सू· स्वपि ।

आदेरतउदोतो वा भवतः । सुवइ । सोवइ । एवं कर्तरि सर्वेषां धातूनां तदादेशेषु च रूपाणि कल्पनीयानि । भावकर्मणो स्तु ।

सू· ईअइज्जौयकः ।

यकः ईअ इज्ज इत्यादेशौ भवतः । होईअइ । होइज्जइ । भूयते । अणुहोईअइ । अणुहोइज्जइ । अनुभूयते इत्यादि । अगागमादयः आदेशाः पूर्ववत्कल्पनीयाः ।

सू· भावकर्मणि तु यग्लुक् ।

भावे कर्मणि च चिज्यादिभ्यो धातुभ्यः परो वकारागमो रित्स्यात् । तत्सन्नियोगेन यको लुक् । चिव्वइ । जिव्वइ इत्यादि ।

सू· मर्चेः ।

भावे कर्मणि च चिनोतेर्मागमो रित्स्याद्वा । तत्सन्नियोगेन यग्लुक्च । चिम्मइ । चीयते ।

सू· अन्त्यस्य हनखनोः ।

मकारो रिद्वा स्यात्, तत्सन्नियोगेन यग्लुक्च । हम्मइ । हन्यते । खम्मइ । खन्यते ।

सू· दुहलिहनहरुहाम्भरतउच्च ।

एषामन्त्यस्य भकारो रिद्वा स्यात् । तत्सन्नियोगेन यग्लुक्च । वहेरतउकारश्च । दुब्भइ । लिब्भइ । वुब्भइ । रुब्भइ ।

सू· दहेर्झर् ।

अन्त्यस्येत्यनुवर्तते । झकारो रिद्वा स्यात् । तत्सन्नियोगेन यग्लुक्च । डज्झइ । डहिज्जइ । दह्यते ।

सू· बन्धोन्धः ।

झकारो वा स्याद्यग्लुक्च । बज्झइ । बन्धिज्जइ । बध्यते ।

सू· रुध उपसमनोः ।

एभ्यः परस्य रुधेः अन्त्यस्य भावकर्मणि झर्वा स्याद्यग्लुक्च । उवरुज्झइ इत्यादि ।

सू· द्विगमिगे ।

गमादिषु अन्त्यस्य द्वित्वं, यग्लुक्च । गम्मइ । हस्सइ इत्यादि ।

सू· ईरहकृतॄञाम् ।

एषामन्त्यस्य ईर इत्यादेशः स्याद्वा । तत्सन्नियोगेन यग्लुक्च ।

हीरइ। कीरइ। तीरइ। जीरइ इत्यादि भावकर्मणो रूपाणि कल्पनीयानि।

अथ णिचिरूपनिर्णयः प्रदर्श्यते।

सू· णिजदेदावावे।

णिचः। अत्। एत्। आव। आवे इति चत्वार आदेशाः भवन्ति। इजादयः। पूर्ववत्। होअइ। होएइ। होआवइ। होआवेइ। भावयति।

सू· शुष्यादेरविर्वा।

शुष्यादेर्णिचः अविर्वा स्यात्।

सू· अदेलुक्याद्योरतः।

णिजादेशेषु अदेल्लुक्षुपत आदेरत आद्भवति। हाबइ। हावेइ। भावयति इत्यादि। केचित् आवे, आव इत्येतयोरपि आत्वमाहुः। हावावइ। हावावेइ इत्यादि। एवं णिचि सर्वेषा धातूनां तदादेशानां च कर्तरि रूपाणि सर्वलकारेषु कल्पनीयानि। णिचि भावकर्मणि तु।

सू· लुगाविल्भावकर्मक्ते।

भावकर्मप्रत्यये क्त प्रत्यये च परे णिचो लुक्, आवि इत्यादेशौ भवतः। लित्वान्नित्यम् होईअइहो आवी अइ। भाव्यते इत्यादि रूपाणि कल्पनीयानि।

सू· लुक्क्यङोर्यस्य।

क्यचः क्यषश्च सम्बन्धिनो यकारस्य क्वचिल्लुग्भवति। गुरुइ। गुरुअइ। गुरूयते इत्याद्यूह्यानि।

इति प्राकृतभाषायां तिङन्तसामान्यप्रक्रिया।

—— 0 ——

## अथ शौरसेनीसामान्यप्रक्रिया

सू. दस्तस्य शौरसेन्यामखावचोस्तोः ।

शौरसेन्यां भाषायां अचः परस्य असंयुक्तस्यानादौ वर्तमानस्य तकारस्य दकारः स्यात् । पिदा-पिता इत्यादि ।

सू. अथः क्वचित् ।

शौरसेन्यां संयोगे अथो वर्तमानस्य तस्य दः क्वचित् । णिच्छिन्दो-निश्चिन्तः इत्यादि ।

सू. र्योय्यः ।

र्यस्य वा य्यो भवति । अय्यो, अज्जो=आर्यः इत्यादि ।

सू. थोधः ।

थस्य धो वा स्यात् । कधा, कहा=कथा इत्यादि ।

सू इहहयोर्हस्य ।

इहशब्दे हकारस्य थध्वमिद्धाहचाविति विहित हकारस्य च धकारो वा स्यात् ।

सू. अन्त्यादिदेति मोणः ।

शौरसेन्यामन्त्यमकाराण्णागमो भवति । इदेतोः परयोः जुत्तंणिमम्-युक्तमिदम्, एव्वम् णेदम् । एवमेतत् ।

सू. शेषं प्राकृतवत् ।

स्पष्टम् ।

इति शौरसेनीसामान्यप्रक्रिया

—— 0 ——

## अथ शौरसेनीशब्दाः

| | | | |
|---|---|---|---|
| पं॰ ए॰ | रामादु, रामादो | पं॰ ब॰ | रामाहिन्तो, रामेहिन्तो, रामासुन्तो, रामेसुन्तो, रामत्तो, रामादो, रामादु, रामाहि, रामेहि । |

शेषं प्राकृतवत् : एवमदन्ताः कृष्णादयः । पूर्वशब्दस्य पुरव इत्यादेशः, रूपाणि तु प्राकृतवत् । अजन्तनपुंसकलिङ्गेषु पञ्चम्यां रामवत् । अन्यत्सर्वं प्राकृतवदेव । इत्यजन्तविशेषाः

## अथ हलन्तविशेषाः

### नकारान्तः पुल्लिङ्गः करिन् शब्दः

| | | | |
|---|---|---|---|
| प्र॰ ए॰ | दे करिआ<br>दे करी<br>दे करि | प्र॰ ब॰ | दे करिओ<br>दे करीउ<br>दे करिणो<br>दे करी |

शेषं प्राकृतवत् । एवमिन्नन्ताः ।

अन्नन्तेषु सर्वत्र दे राअम् । दे सुकम्मम् । दे अप्पम् इत्येकं रूपमधिकम् । अन्यत्सर्वं प्राकृतवत् ।

### तकारान्तः पुल्लिङ्गो भवच्छब्दः

| | | | |
|---|---|---|---|
| प्र॰ ए॰ | भवम् | प्र॰ ब॰ | भवा |

शेषं प्राकृतवत् । एवं कृपावान् मघवान् इत्यादयः ।

## इति हलन्तविशेषाः

### अथ अव्ययानि

दाव, ताव, दा, ता=तावत्

इह, इध=इह

दाणिम् = इदानीम्

ता=तस्मात्

रमिअ, रमिदूण=रन्त्वा इत्यादि ।

कदुअ, करिअ, करिदूण=कृत्वा

गमिअ, गमिदूण, गदुअ=गत्वा

णम्=ननु

अम्हहे=सन्तोषे

हीही=वैदूषकहर्षे

हीमाणहे=आश्चर्ये, कष्टे च ।

एव्व=एव

चेट्याह्वाने हंजे

इत्यव्ययविशेषाः ।

इति शौरसेन्यां सुबन्तभागः

—— ० ——

### अथ शौरसेन्यां तिङन्तप्रक्रिया

सू॰ भुवो भः ।

भवतेरादेशस्य हुस्य भो वा स्यात् ।

सू॰ इजेचोर्दट् ।

लटस्तिप्तादेशयोरिजेचोर्दकारागमो भवति । टित्वादाद्यावयवः । भोदि । भुवदि । भुवदे । भवति इत्यादि ।

सू. भविष्यतिस्सि ।

भविष्यदर्थे विहितस्य हे स्थाने स्सि भवति । भोस्सिदि । भविष्यतीत्यादि—सर्वलकारेषु रूपाणि कल्पनीयानि । अगागमादयश्च । पूर्ववत् ।

इति शौरसेनी तिङन्तप्रक्रिया

—— 0 ——

## अथ मगधीसामान्यप्रक्रिया

सू. स्रोः श्लौ ।

मागध्यां सकाररेफयोर्यथासङ्ख्यं शकारलकारौ स्तः ।

सू. च्छोऽनादौश्चः ।

अनादौ वर्तमानस्य लाक्षणिकस्यालाक्षणिकस्य च च्छस्य श्चो भवति । पिश्चिले-पिच्छिलः । वत्सलः-वच्छलो, वश्चले ।

सू. क्षः कः ।

अनादौ वर्तमानस्य क्षस्यजिह्वामूलीयाक्रान्तककारो भवति । लःकशे-राक्षसः ।

सू. स्सषोस्संयोगेऽग्रीष्मे ।

अनादिमयोः संयोगे वर्तमानयोः सकारषकारयोः सकारो भवति । ग्रीष्मे न भवति ।

पशस्ते-प्रशस्तः, शुस्के-शुष्कः, गिम्हे-ग्रीष्मः ।

सू. न्यण्यज्ञञ्जांञार् ।

एषां ञाकारः स्यात् । रित्वाद्द्वित्वम् ।

धञ्ञे-धन्य, गञ्ञे-गण्य:, सामञ्ञे-सामञ्ज:, धणञ्जाए-धनञ्जय: इत्याद्यूह्यम्

सू· जयद्यां य: ।

एषां यकारो भवति । समाये-समाज:, यये-जय:, हिय्ये-हृद्य: ।

सू· ट्टष्टोस्थम् ।

एतयो: स्थ: स्यात् । शुस्थु-सुष्ठु, भस्थे-भट्ट: इत्यादि ।

सू स्थर्थोस्तम् ।

स्थर्थयो: स्त: स्यात् । स्तिदे-स्थित:, अस्ते-अर्थ: इत्यादि ।

सू· मागध्यां शौरसेनीवत् । स्पष्टम् ।

सू· शेषं प्राकृतवत् । शौरसेन्यां मागध्यां चानुक्तमित्यर्थ: । इति मागधीसामान्यप्रक्रिया ।

अकारान्त: पुंलिङ्गो राम शब्द:

| | | | |
|---|---|---|---|
| प्र· ए· | लामे | प्र· ब· | लामा |
| ष· ए· | लामाह | ष· ब | लामाहँ |
| | लामश्श | | लामाणम् |
| | | | लामाण |

शेषं शौरसेनीवत् ।

एवं अदन्ता:, नपुंसकलिङ्गानामपि षष्ट्येवमेव । शेषं प्राकृतवत् ।

अहम्, वयम् एतयो: स्थाने हगे इत्यादेशो भवति । अन्यत्सर्वं शौरसेनीवत्प्राकृतवच्च । इति मागध्यां सुबन्तविभाग: ।

अथ मागधीतिङन्तप्रक्रिया

सू. स्कः प्रेक्षाचक्षतेः ।

अनयोः क्षस्य स्कः स्यात् । पेस्कदि प्रेक्षते । आअस्कदि-आचक्षते इत्यादि सर्वलकारेषु रूपाणि ।

सू. जोव्रजेः ।

व्रजेर्जकारस्य ञकारो रिद्भवति ।
वञ्ञादि, वञ्ञादे-व्रजति इत्यादि ।

सू. चिट्ठस्तिष्ठस्य ।

ष्ठाधातोरादेशस्य तिष्ठस्य चिट्ठ इति भवति । चिट्ठदि, चिट्ठदे तिष्ठति । शेषं प्राकृतवच्छौरसेनीवच्च रूपाण्यूह्यानि ।

इति मागधीतिङन्तप्रक्रिया

——०——

अथ पैशाचीसामान्यप्रक्रिया

सू. नोणनो पैशाच्याम् ।

पैशाच्यां भाषायां णकारनकारयोः नकारो भवति ।

सू. न्यण्यज्ञां ञ्र् ।

पैशच्यामेषां ञकारः स्यात् । रित्वात् द्वित्वम् ।
धञ्ञो धन्यः, गञ्ञो-गण्यः, पञ्ञो प्राज्ञः ।

सू. तलतदोः ।

तकारदकारयोः तकारो भवति । पतिपन्नो-प्रतिपन्नः, मतो-मदः इत्यादि ।

सू. लोलः ।

स्पष्टम् । कोमलो-कोमलः ।

सू· दुस्तियादृशगे ।

यादृशादिषु 'दृ' इत्यस्य 'ति' इति स्यात् ।

यातिसो-यादृशः, तातिसो-तादृशः, भवातिसो-भवादृशः इत्यादि ।

सू· र्यस्नष्टां रियसिनसिटाः क्वचित् ।

र्य, स्न, ष्ट एषां स्थाने रिअ, सिन, सिट, इत्यादेशा यथा सख्य भवन्ति । आरिओ-आर्यः, सिनातो-स्नातः, कसिटो-कृष्टः ।

सू. टोस्तुतु ।

टु इत्यस्य तु इति वा स्यात् । कतुको, कटुको-कटुकः इत्यादि ।

सू· शषोस्सः ।

स्पष्टम् । सेसो-शेषः इत्यादि ।

सू· ष्ट्वः ट्ठूनत्थूनौ ।

ष्ट्व इत्यस्य ट्ठून त्थून इत्यादेशौ भवतः । कट्ठून, कत्थून-कृष्ट्वा इत्यादि ।

सू· शेषं शौरसेनीवत् ।

स्पष्टम् । अत्र हलादेशाः प्रायशो न भवन्ति । इति पैशाचीसामान्यप्रक्रिया .

---

अकारान्तः पुंलिङ्गो रामशब्दः

| | | | |
|---|---|---|---|
| पं· ए· | रामातु, रामातो | पं ब· | रामाहिन्तो, रामेहिन्तो, रामासुन्तो, |

रामेसुन्तो, रामाहि,
रामेहि, रामत्तो,
रामातो, रामातु ।

शेषं प्राकृतवत्

नपुंसकलिङ्गानामप्येवमेव हृदयमित्यस्य हितपमिति रूपे प्राकृतवच्छौरसेनीवच्च । राजन् शब्दस्य सिद्धावस्थापेक्षया यत्र यत्र ज्ञकारो दृश्यते, तत्र तत्र ज्ञकारस्य विकल्पेन चिञ् इत्यादेशः स्यात् । राचिञो राज्ञः, पक्षे रण्णो-राज्ञः इति ।

तदिदमोः पुंसि तृतीयैकवचनेन । स्त्रियां नाये इति भवति । अव्ययेषु क्त्वा प्रत्यये विशेषः ।

गन्तून-गत्वा इत्यादि शेषमखिलं शौरसेनीवत्प्राकृतवच्च ।

इति पैशाच्या सुबन्तविभागः

— — ० — —

अथ चूलिकापैशाचीसामान्यप्रक्रिया

सू. रोऌस्तु चूलिकापैशाच्याम् ।

चूलिकापैशाच्यां रेफस्य लकारो वा स्यात् । रामो, लामो राम: इत्यादि ।

सू. गजडदबघझढधभां कचटतपखछठथफाल् ।

गादीनां क्रमात् कादयः स्युः । मक्कनो-मार्गणः, नको-नगः, राचा, लाचा-राजा, टमलुको, टमरुको-डमरुकः, मतनो-मदनः, पालको-बालकः, मेखो-मेघः छलो, छरो-झरः, काठम्-गाढम्, थाला, थारा-धारा, रंफा लंफा-रम्भा । क्वचिल्लाक्षणिकस्यापि पडिमा, पटिमा-प्रतिमा इत्यादि ।

सू· अन्येषामादियुजिन ।

गजडादि सूत्रोक्तमादौ वर्तमानानां युजि धातौ च न भवति, अन्येषां मतेन । जनो-नियोजितम् इत्यादि ।

सू· शेषं प्राग्वत् । स्पष्टम् ।

इति चूलिकापैशाचीप्रकरणम्

— — ० — —

अथ पैशाचीतिङन्तप्रक्रिया

सू· तडिजेचः ।

इजेचोस्तडागमः स्यात् । भोति-भवति, भवत इत्यादि ।

सू· एय्य एव भविष्यति ।

भविष्यदर्थे विहितयोरिजे चो स्थाने एय्यादेश एव भवति । नत्वातिदेशिकस्शिः । भो एय्य-भविष्यति ।

सू· इय्योयकः ।

स्पष्टम् । भोइय्यति-भूयते ।

सू· क्रिञोडीरः ।

कृञो यकस्थाने डीर इति भवति । कीरति, कीरते-क्रियते इत्यादि । सर्वलकारेषु प्राकृतवच्छौरसेनीवच्च रूपाण्यूह्यानि ।

इति पैशाचीतिङन्तप्रक्रिया

— — ० — —

चूलिकापैशाच्यां सर्वं पैशाचीवत् । सर्वत्रोपदिष्टेनातिदिष्टस्य बाधः ।

## अथ अपभ्रंशभाषासामान्यप्रक्रिया

सू· तुमोङ्वम् ।

असंयुक्तस्यानादौ वर्तमानस्याचः परस्य मस्य वा वस्स्यात् । ङित्वात्सानुनासिक उच्चारः ।

सू· अचोस्तवो खौ कखतथपफगघदधबभान् ।

असंयुक्तानामनादौ वर्तमानानां अचः परेषां कादीनां यथासङ्ख्यं गादयः स्युः प्रायः । लोगु लोक, मधु मखः, सुदु-सुतः, णाधु-नाथः, ताबु तापः, कभु-कफ. इत्यादि सञ्चारणीयम् ।

सू· म्होम्भम् ।

म्हस्य लाक्षणिकस्य म्भः स्यात् । ब्राह्मणः-बम्हणो, बम्भणो इत्यादि ।

सू रोलुकमधः ।

अधोवर्तमानस्य रेफस्य लुग्वा स्यात् ।
पिउ, प्रिउ-प्रियः इत्यादि ।

सू· क्वचिदभूतोऽपि ।

रेफस्यादित्यर्थः । व्रासु·व्यासः ।

सू· प्रायोऽपभ्रंशेचोऽच् ।

अपभ्रंशेऽचस्थानेऽन्योऽच् क्वचिद्भवति । प्राय इत्यस्याभाषान्तमनुवृत्तिः ।

सू· अडडडुल्लास्वार्थिककलुक्च ।

नाम्नः अ, डड, डुल्ल इति प्रत्ययाः भवन्ति, तत्सन्नियोगेन स्वार्थिककप्रत्ययलोपः । डड इत्यत्राद्योडकारइत् । रामउ, रामडु, रामुल्लु-रामः ।

सू. क्तान्तस्यात उं स्वमोः ।

कान्तस्य तान्तस्य च अकारान्तस्य उं स्यात् स्वमोः परयोः नपुंसकलिङ्गे । कुण्डउम्-कुण्डकम्, करउम्-कृतम्, भग्गउम्-भग्नम् ।

सू. तणेणतेसिन्तेसितेहिंकेहिन्तादर्थ्ये ।

तादर्थ्ये द्योत्ये एते प्रत्ययाः भवन्ति । रामतणेन, रामतेसिम्, रामतेसि, रामतेहिम्, रामकेहिम्-रामार्थम् इत्यादि ।

सू. लिङ्गमतन्त्रम् । स्पष्टम् ।

इत्यपभ्रंशभाषासामान्यप्रक्रिया

—— o ——

अकारान्तः पुंलिङ्गो रामशब्दः

| | | | |
|---|---|---|---|
| प्र. ए. | रामु, रामू, राम, रामो | प्र. ब. | राम, रामा |
| सं. प्र. ए. | दे रामु, दे रामू, दे रामो, दे राम, दे रामा | सं. प्र. ब. | दे रामहो, दे रामाहो |
| द्वि. ए. | रामु, रामू, रामो, रामा, राम | द्वि. ब. | राम, रामा, रामि, रामे |
| तृ. ए. | रामेण, रामेम्, रामे | तृ. ब. | रामेहिम्, रामहिम्, रामाहिम्, रामे |
| पं. ए. | रामहे, रामाहे, रामहु, रामाहु | पं. ब. | रामहुम्, रामाहुम् |

| | | | |
|---|---|---|---|
| ष. ए. | रामसु, रामासु, रामस्सु, रामहो, रामाहो, राम, रामा | ष. ब. | रामहम्, रामाहम्, राम, रामा |
| स. ए. | रामि, रामे | स. ब. | रामहिम, रामाहिम्, रामसु, रामासु, रामसुम्, रामासुम् |

एवमदन्ताः

अत्र मकारस्य तु मोऽत्वमित्यनुनासिकवकारश्च वा वक्तव्यः । विम्नु-विषण्णः, विच्चु-वर्त्म, वुत्त-उक्तः, जइसु-यादृशः, तइसु-तादृशः, कइसु-कीदृशः, अइसु-ईदृश, अण्णाइसु, अवराइसु-अन्यादृशः ।

अवरोवरु—परस्परः इत्यादि सर्वं रामवत् सर्वशब्दस्य विकल्पेन साह इत्यादेशः ।

| | | | |
|---|---|---|---|
| पं. ए. | सव्वहम्, सव्वाहम्, साहहम्, साहाहम् | पं. ब. | सव्वहुम्, सव्वाहुम् साहहुम्, साहाहुम् |

शेषं आदेशद्वयेऽपि रामवत् : एवं विश्वादयः ।

इकारान्तः पुंलिङ्गः कवि शब्दः

| | | | |
|---|---|---|---|
| प्र. ए. | कइ, कई | प्र. ब. | कइ, कई, कइहो, कईहो |

| | | | |
|---|---|---|---|
| स· प्र· ए· | दे कइ, दे कई | सं· प्र· ब· | दे कइहो, दे कईहो |
| द्वि· ए· | कइ, कई (बहुवचनमप्येवमेव) | | कइ, कई |
| तृ· ए· | कइएम्, कईएम्, कइण, कईण, कइम्, कईम् | तृ, ब· | कइहिम्, कईहिम् |
| प· ए· | कइहे, कईहे | पं· ब· | कइहुम्, कईहुम् |
| ष· ए· | कइ, कइहुम्, कईहुम् | ष. ब· | कइहम्, कईहम्, कइहुम्, कईहुम्, कइ, कई |
| स ए· | कइहि, कईहि, कइहुम्, कईहुम् | (बहुवचनमप्येवम्) | |

एवं रविः हरिः इत्यादयः ।

उकारान्तः पुंलिङ्गः कारु शब्दः

| | | | |
|---|---|---|---|
| प्र· ए· | कारु, कारू | प्र· ब. | कारु, कारू, कारुहो, कारूहो |

इत्यादि सर्वं कविवत् एवमुकारान्ताः । ऋकारान्तानां तु ऋकारस्यात्वोत्वयो रामवत्कारुवच्च रूपाणि कल्पनीयानि ।

इत्यजन्ताः पुंलिङ्गः

आकारान्तस्त्रीलिङ्गो जाया शब्दः

| | | | |
|---|---|---|---|
| प्र· ए· | जाआ, चाआ, जाई, जाइ | प्र· ब· | जाआउ, जाआओ, जाईउ, जाईओ, जाअउ, जाअओ, |

जाइउ, जाइओ

| | | | |
|---|---|---|---|
| सं. प्र. ए. | दे जाआ, दे जाअ<br>दे जाई, दे जाइ | सं. प्र. ब. | दे जाआउ,<br>दे जाआओ,<br>दे जाअउ,<br>दे जाअओ,<br>दे जाआहो,<br>दे जाअहो,<br>दे जाईउ,<br>दे जाईओ,<br>दे जाइउ,<br>दे जाइओ,<br>दे जाईहो,<br>दे जाइहो |
| द्वि. ए. | जाआ, जाअ, जाई,<br>जाइ | द्वि. ब. | जाआउ,<br>जाआओ, जाअउ,<br>जाअओ, जाईउ,<br>जाईओ,<br>जाइउ, जाइओ,<br>(जाआ, जाअ,<br>जाई जाइ) इति<br>केचित्<br>तच्चिन्त्यम् |
| तृ. ए. | जाआण, जाअण,<br>जाआम्, जाअम्,<br>जाइण, जाईण, जाईम्,<br>जाइम्, जाईएम्, जाइएम् | तृ. ब. | जाआहिम्,<br>जाअहिम्,<br>जाईहिम्,<br>जाइहिम् |

| | | | |
|---|---|---|---|
| प. ए. | जाआहे, जाअहे, जाईहे, जाइहे | पं. ब. | जाआहुम्, जाअहुम्, जाईहुम्, जाइहुम् |
| ष. ए. | जाआहे, जाअहे, जाईहे, जाइहे. (जाआ, जाअ, जाई, जाइ इति केचित् । तच्चिन्त्यम् | ष. ब. | जाआहुम्, जाअहुम्, जाई-हुम्, जाइहुम् (जाआ, जाअ, जाई, जाइ इमान्यपि चिन्त्यानि |
| स. ए. | जाआहिम्, जाअहिम्, जाईहिम्, जाइहिम् बहुवचनमप्येवमेव | स. ब. | जाआहिम्, जाअहिम्, जाईहिम्, जाइहिम् |

एवमकारान्ताः सर्वशब्दस्य सहादेशोऽपि जायावत् । पञ्चम्यां विशेषः विश्वादीनामपि तथैव । रुच्यादीनां तु जाया-शब्दस्य इकारान्तत्वे ईकारान्तत्वे च यथातद्वद्रूपाण्यूह्यानि । ऋकारान्तानामपि ऋकारस्यात्वे ईत्वे च जायावदेव ।

इत्यजन्ता स्त्रीलिङ्गाः

अथ अजन्तनपुंसकलिङ्गाः

अकारान्तनपुंसकलिङ्गः कुण्ड शब्दः

| | | | |
|---|---|---|---|
| प्र. ए | कुण्डु, कुण्डं, कुण्डउम् | प्र. ब. | कुण्डाइम्, कुण्डइम्, कुण्ड, कुण्डा, कुण्डे |

शेषं रामवत् एवमकारान्ताः ।

इकारान्तनपुंसकलिङ्गो वारि शब्दः

| | | | |
|---|---|---|---|
| प्र· ए· | वारि, वारी, वारिउम् | प्र· ब· | वारिइम्, वारीइम् |

शेषं कविवत् । एवं अजन्तनपुंसकलिङ्गाः ।

सर्वादीनां तु पञ्चम्यामेव विशेषः ।

अथ हलन्तविशेषाः

मकारान्तः पुंलिङ्गः किं शब्दः

| | | | |
|---|---|---|---|
| प्र· ए· | कु, कू, क, का, को | प्र· ब· | के |
| पं· ए· | किह, कहम्, काहम् | पं ब· | कहुम्, काहुम् |
| ष· ए· | कासु, कसु, कस्सु, कहो, क, का | ष· ब· | कहम्, काहम्, क, का |

शेषं सर्ववत् । एवं कइम्, कवण इत्यादेशयोरपि रूपाणि । इद शब्दस्य नित्यं जसि, शसि च आअ इत्यादेशः अन्यत्र इमादेशश्च ।

| | | | |
|---|---|---|---|
| प्र· ए· | इमु, इमू, इम, इमा, इमो, आअ, आआ, आउ, आऊ, आओ | प्र· ब· | आए, आअ, आआ |

शेषमादेशद्वयेऽपि सर्ववत् ।

दकारान्तः पुंलिङ्गो यच्छब्दः

| | | | |
|---|---|---|---|
| प्र· ए· | द्रुम्, जु, जू, ज, जा, जो | प्र· ब· | जे, ज, जा |
| द्वि· ए· | द्रुम्, जु, जू, ज, आ, जो | द्वि· ब· | दे, द, दा, दि |

इत्यादि यद्वत्

दकारान्तः पुल्लिङ्गः एतच्छब्दः

प्र. ए. एहो प्र. ब. एइ, एई

एवमेव द्वितीयायामपि शेषं सर्ववत्

जेहु=यादृक्, तेहु=तादृक्, केहु=कीदृक्, एहु=ईदृक् इत्यादि रामवत् ।

नकारान्तः पुंलिङ्गः अदश्शब्दः

प्र. ए. अमु, अमू प्र. ब. ओइ

एवमेव द्वितीयापि शेषं कारुवत् ।

इति हलन्तपुंलिङ्गाः

—— 0 ——

अथ हलन्ता स्त्रीलिङ्गाः

किं शब्दस्य कादेशे प्रथमाद्वितीययोरिदं तत्वमीदन्तत्वं च न, अन्यत्सर्वं जायावत् ।

एव यत्तच्छब्दयोरपि विशेषस्तु पञ्चम्येकवचने ।

काहे=कस्याः, जाहे=यस्याः, ताहे=तस्याः इत्येव ।

एतच्छब्दस्तु प्रथमाद्वितीययोरेकत्वे, एहा बहुत्वे पुंवत् । अन्यत्रान्त्यहलो लोपे तस्य दत्वे च जायावत् । अदश्शब्दस्य अम्हादेशे प्रथमाद्वितीययोः पुंवत्, शेषं रुचिवत् ।

इति हलन्तास्त्रीलिङ्गाः

—— 0 ——

मकारान्तनपुंसकलिङ्गः किं शब्दः

प्र. ए. किम्, काइम्, कवणु, कवणू प्र. ब. कइम्, काइम्, क, का, के,

कवणइम्,
कवणाइम्,
कवण, कवणा,
कवणे

पुनस्तद्वत् । शेषं पुंवत् ।

मकारान्तनपुंसकलिङ्गः इदं शब्दः

| | | | |
|---|---|---|---|
| प्र. ए. | इमु, इमं | प्र. ब. | आआइम्, आअइम्, आअ, आआ, आए |
| द्वि. ए. | इमु, इमं | द्वि. ब. | आआइम्, आअइम्, आअ, आआ, आए |

अन्यत्र इमादेशे आआदेशे च सर्ववत् ।

दकारान्तनपुंसकलिङ्गो यच्छब्दः

प्र. ए. द्रुम्, द्रु, जम्, (जइम्, जाइम् । पुनस्तद्वत्-शेषं पुंवत् ।

दकारान्तनपुंसकलिङ्गः तच्छब्दः

| | | | |
|---|---|---|---|
| प्र. ए. | त्रुम्, द्रु, तम् | प्र. ब. | तइम्, ताइम् |

पुनस्तद्वत् शेष पुंवत् ।

दकारान्तनपुंसकलिङ्ग एतच्छब्दः

| | | | |
|---|---|---|---|
| प्र. ए. | एहु | प्र. ब. | एइ, एई, एदम्, एदइम्, एदाइम् |

चिन्त्यमेतत् । पुनस्तद्वत् । शेषं पुंवत् ।

सकारान्तनपुंसकलिङ्गोऽदश्शब्दः

| | | | |
|---|---|---|---|
| प्र· ए· | अमु, अमू | प्र· ब· | ओइ, आई, (अमुइम्, अमूइम्) |

चिन्त्यम् । पुनस्तद्वत् । शेषं पुंवत् ।

इति हलन्ता नपुंसकलिङ्गाः

दकारान्तो युष्मच्छब्दः लिङ्गत्रयोऽपि समानः

| | | | |
|---|---|---|---|
| प्र· ए· | तुहम् | प्र. ब. | तुम्हे, तुम्हइ |
| द्वि· ए· | एइम्, तइम् | द्वि· ब· | तुम्हे, तुम्हइ |
| तृ· ए· | एइम्, तइम् | तृ· ब· | तुम्हेहिम् |
| पं· ए· | तुज्झ, त्रुध, तउ, तुह, तओ | पं, ब· | तुम्हहम् |

षष्ट्यप्येवमेव ।

| | | | |
|---|---|---|---|
| स· ए· | एइम्, तइम् | स· ब· | तुम्हासु |

दकारान्तोऽस्मच्छब्दः लिङ्गत्रयोऽपि सरूपः

| | | | |
|---|---|---|---|
| प्र· ए· | हउम् | प्र· ब· | अम्हइम्, अम्हेइम् |
| द्वि· ए· | मइम् | द्वि ब· | अम्हइम्, अम्हेइम् |
| तृ· ए· | मइम् | तृ· ब· | अम्हेहिम् |
| पं· ए· | महु, मज्झ | पं· ब, | अम्हहम् |

षष्टीचैवम्

| | | | |
|---|---|---|---|
| स· ब· | मइम् | स· ब· | अम्हासु |

इत्यस्मच्छब्दः

अथ अव्ययविशेषाः

किह, किध, किम, केम = कथम्
जिह, जिध, जिम, जेम = यथा
तिह, तिध, तिम, तेम=तथा
जाउम्, जामहि, जाम=यावत्
ताउम्, तामहि, ताम=तावत्
सव्वत्तहो=सर्वत्र

एवमन्यत्राप्यूह्यम्

विशेषस्तु

जइ, जेत्तु=यत्र
तइ, तेत्तु=तत्र
केत्तु=कुत्र
एत्तु=अत्र
करइ, करइउ, करए, करअवि, करएप्पि, करएप्पिणु,
करएपि, करएपिणु=कृत्वा

एवं सर्वत्रोह्यम्

करएवम्, करअण, करअणअम्, करअणहिम्, करएप्पि,
करएप्पिणु, करएपि, करएपिणु=कर्तुम्

एवमेव सर्वत्र कल्पनीयम् ।

जणि, जणु, नम्, नइ, नावइ, नाइ=इव
डि=एव
एम=एवम्
किर=किल
पग्गिम, प्राइम, प्राउ, प्राइव=प्रायः
पुणु=पुनः

विणु=बिना
ध्रुवु=ध्रुवम्
पर=परम्
नाहि=नहि
पच्चलिउ=प्रत्युत
दिवे=दिवा
सहुम्=सह
मम्=मा
कउ, कहु, तिहु=कुतः
अवासेम्, अवास=अवश्यम्
एगिसि=एकशः
एव्वहिम्=इदनीम्
एमइ=एवमेव
समाणु=समम्
अहवइ=अथवा
मणाउम्=मनाक्
एत्तहे=इतः
पच्चइ=पश्चात्
तो=तत , तदा
अनु=अन्यथा

इत्यव्ययविशेषाः

अथ तद्धितविशेषाः

एत्तलु, एवडु=इयत्
केत्तुलु, केवडु=कियत्
जेत्तुलु, जेवडु=यावत्
तेत्तुलु, तेवडु=तावत्

पड्डुप्पणु=पटुत्वम्, पटुता

एवं तु हलन्ताः ।

जेएव्वइ, जेएप्पइ, जेएव्व, जेइएव्वइ, जेएव्वउ=
जेतव्यः

एवं तव्यन्ताः ।

होणउ=भविता
सुणउ=श्रोता

इत्यादि तृन्नन्ताः ।

तुम्हारु=युष्मदीयः
अम्हारु=अस्मदीयः

इति तद्धितविशेषाः

—— 0 ——

अथापभ्रंशतिङन्तप्रक्रिया

सू. इजेचोर्दट् ।

होदि, हुवदि, हुवदे=भवति ।

सू. लटोर्हिं वा झझ्योः ।

अपभ्रंशे लटोझझ्योर्हिं वा स्यात्, होहिम्, हुवहीम् इत्यादि भवन्ति । पक्षे होन्ति इत्यादि । हिथास्सिसोः । अपभ्रंशे-थास्सिपोर्हिस्स्याद्वा । होहि, हुवहि इत्यादि भवसि । पक्षे होसीत्यादि ।

सू. हुथध्वमोः ।

अपभ्रंशे थध्वमोर्हुः स्याद्वा । होहु, हुवहु इत्यादि भवथ । पक्षे होइढा इत्यादि ।

सू उमिबिटोः ।

मिबिटोर्वा उकारो भवति । होउ, हवउ इत्यादि भवामि । पक्षे होमीत्यादि ।

सू हु मस्महिङोः ।

मस्महिङोर्हुं वा भवति । होहु इत्यादि भवामः । पक्षे होमो इत्यादि ।

सू सस्यपोऌटि ।

ऌटि विहितस्य स्यापोऽपभ्रंशे सो वा स्यात् । होसदि= भविष्यति । होसहिम्=भविष्यन्ति इत्यादि ।

सू इदुदेत्स्वह्योः ।

लोण्मध्यमपुरुषैकवचनस्य स्थाने विहितयोः स्वह्योः । इ, उ, ए इति त्रय आदेशाः भवन्ति । होइ, होउ, होए=भव । अन्यत्र हिमादयः प्राकृतरूपता च । शेष प्राकृतवत् ।

सू. लिङ्गमतन्त्रम् ।

अपभ्रंशे लिङ्गमविवक्षितं प्रायः ।

सू शेषं शौरसेनीवत् ।

स्पष्टम् ।

इत्यपभ्रंशतिङन्तसामान्यप्रक्रिया

— — o — —

सू. तद्व्यत्ययश्च ।

प्राकृतादिलक्षणानां परस्पर व्यत्ययश्च क्वचिद् भवति । इति प्राकृतादिभाषासु तिङन्तसामान्यप्रक्रिया ।

धात्वादेशादयः विस्तरभिया न लिखिताः ।

अथ गणाः प्रदर्श्यन्ते

सू॰ स्वर्वेभ्यो वक्रादौ ।

वक्रादिषु यथादर्शनं स्वरेभ्यः परो बिन्दुः भवति । वक्रः=वंको । वक्रकुट्मलबुध्नास्थिपुच्छकर्कोटवृश्चिकाः । "गुच्चदर्शनमूर्धानःपश्वश्रुत्श्मश्रुगृष्टयः । स्पर्शन श्मश्रु-मार्जाराः प्रथमाद्बिन्दुशालिन." । छन्दः पूर्तौ देवनागे मनस्विन्यां प्रतिश्रुति । मनश्शिलाया पार्श्वास्थिनवयस्येपि मनस्विनि ।"

द्वितीयतः तृतीयात्तु स्यादुपर्यतिमुक्तयोः ।

सू॰ लुङ्मासादौ ।

मांसादिषु बिन्दोर्लुग्वा स्यात् ।

मासम् । मंसम् । मांसादिस्तु तदानी कथमेवं कि करोमि नूनमिदानीम् । कांस्य मांसलसंमुखपांसुलपांसव इतीरितो हि गणोऽयम् ।

सू॰ अक्ष्यर्थकुलाद्यावा ।

अक्षिपर्याया. कुलादयश्च पुलिङ्गे वा प्रयोक्तव्याः । विद्यु-च्छन्दोभाजनमाहात्म्यं दुःखवचनकुलम् इत्यादि ।

सू॰ क्लीबे गुणगाः ।

गुणादयः क्लीबे वा प्रयोक्तव्या । गुणदेवमण्डलाग्राः खड्गो बिन्दुश्च कररुहो वृक्षः इत्यादि ।

सू॰ स्त्रियाभिमाञ्जलिगाः ।

इमान्ताः अञ्जल्यादयश्च स्त्रियां वा वर्तन्ते । कुक्षि-बली-निधिरश्मिप्रश्नाक्षिग्रन्थिचौर्यविधिपृष्ठम् । अञ्जल्यादिः पृष्ठस्य कृते त्वस्यैव सङ्ग्रहणम् ।

सू तु समृध्यादौ ।

समृध्यादिष्वादेरवर्णस्य वा दीर्घः स्यात् । सामिद्धी, समिद्धी=समृद्धिः । प्रतिसिद्धिसदृक्षमनस्विनः प्रसुप्त-प्रवासि चतुरन्ताः । अभिचात्यस्पर्शप्रवचनप्रसिद्धिप्ररोह-परकीयाः । प्रतिपत्प्रकृतप्रकटास्सहप्रतिस्पर्धिना समृद्ध्यादिः ।

सू. स्वप्नादाविल् ।

स्वप्नादिष्वादेरवर्णस्य इत्वं लिद्भवति । किविणो=कृपणः । वेतसकृपणमृदङ्गोत्तमदत्ते ष्वद्व्यलीकमरिचाश्च । व्यजन-मिति स्वप्नादिर्वेतसदत्तौविकल्पेत्कौ । वेतस इति तोरिति वेतसे विकल्पात् भवेदित्वम् दत्ते, णत्वे, सत्येवाङ्गारे लत्व एव बाहुलकम् ।

सू. ज्ञोनोऽभिज्ञादौ ।

अभिज्ञादिषु ज्ञकारादेशस्य णस्य सम्बन्धिनोऽवर्णस्य उत्वं भवति । अभिज्ञः । अहिण्णू । आगमसर्वात्मेङ्गितदैवाभि-मन कृताज्ञान्ताः ।

सू शय्यादौ ।

शय्यादिषु आदेरवर्णस्य एत्वं भवति । शय्या । सेज्जा । शय्यादिगणअम्नात. शय्यात्र ग्राह्यः कन्तुकाः ।

सू. इत्तु सदादौ ।

सदादिष्वादेराकारस्य इत्वं वा स्यात् । सइ । सआ । सदा । निशाकरश्च कूर्पासनः [illegible] इष्यते ।

सू. नवाव्ययोत्खाताद्यौ ।

व्याख्यातम् । प्राकृतकुमारचामरसंस्था [illegible] तगाराद्याः ।

प्रस्थापितः कलादः स्थापितखादिरकहालिकबलाकाः ।
ब्राह्मण पूर्वाण्हावप्युत्खातादिः प्रकीर्तितः तज्ज्ञैः ।

सू· गभीरगइत् ।

गभीरादिष्वादेरीकारस्य इत्वं भवति । गहिरो । गभीरः ।
प्रसीदवल्मीकानीतप्रदीपितशिरीषकाः । गृहीतजीवदव-
सीदद्द्वितीयतृतीयकाः ।

व्रीलितं च गभीरादिरानीतेदिरपि स्त्रियाम् ।

सू· वा पानीयगे ।

पानीयादिष्वादेरीत इद्वा स्यात् । पाणिआन् । अणीअम् ।
पानीयम् । जीवत्यलीकपानीयोपनीतेषत्करीषकाः । पानी-
यादावेव केचिच्छिरीषं कथयन्ति हि ।

सू· मुकुलादौ ।

आदेरुत अत्व भवति नित्यम् । मउलम्=मुकुलम् । मुकु-
लम्, मुकुरम्, मुकुटम्, युधिष्ठिरः सौकुमार्य च । अगुरु
गुलूचीगुर्व्यो विद्रुत आत्वं तु बाहुलकम् ।

सू· इल्कृपगे ।

कृपादिष्वादेऋत इत्वं लित्स्यात् । कृपः । किवो । कृप-
नृपकृपणधिकृशाः कृशानुशृङ्गारवृद्धकविगृध्राः । भृङ्गार-
नृगसृगालाः वृश्चिकदृष्टिस्पृहाहृदयतृप्ताः । धृष्टोत्कृष्ट
समृद्धिव्याहृतभृङ्गर्षिकृतिकृषिका. । कृसरकृपाणवितृष्णाः,
पृथ्वीभृगुकृच्छ्रधृतिकृपावयत्याः । घुसृणसकृत्सृष्टानि च
बृसीघृणाबृंहितानि गृष्टिश्च । भृगहृतभृतकपितृघ्नावृति-
श्च नृत्तिश्च गृध्नुश्च ।

तृषितं वृत्तं सृष्टिर्मृष्टस्येद्रसवदर्थकस्यैव ।

सू· ऋतुगे ।

ऋत्वादिष्वादे ऋत उत्वं भवति नित्यम् । ऋतुः । उऊ । ऋतुबृन्दावन ऋषभभ्रातृकबृन्दवृवृष्टऋजुवृद्धाः । पृथिवी मृणालनिवृताः प्रावृड्वृत्तान्तसंवृतस्पृष्टाः । निर्वृतिनिर्वृत-पितृकाः सभृतविवृतप्रवृत्तिनिर्वृत्ता । वृद्धिनिवृत्तीप्रभृति-निवृत्तजामातृको परावृत्तः । निभृतप्राभृतपरभृतभृतिभृत-ऋणमातृकापरामृष्टाः ।

सू शौण्डगे ।

शौण्डादिष्वादेरैचो नित्यमुत्वं भवति ।

शौण्ड =सुण्डो । शौद्धोदनिमौञ्जायनादौ वारिकशौण्ड-सौन्दर्यम् । सौवर्णिकपौलोमीसौगन्ध्यानीति शौण्डादिः ।

सू· अइतुवैरादौ ।

वैरादिष्वादेरैच अइइत्यादशो वा स्यात् । वइरम्, वेरम्=वैरम् । वैर वैशम्पायनवैशिकवैश्रवणचैत्रकैलासाः । वैता-लिककैरवदैवानीत्येतत्तु वैरादि ।

सू· दैत्यादौ ।

दैत्यादिष्वादेरैचः अइ स्यान्नित्यम् ।

दैत्यः=दइच्चो । दैत्यो दैन्यदैवककैतववैदर्भवैदेह्याः । ऐश्वर्यं वैजननो भैरववैहारिको च वैदेशः । वैश्वानरवैशाखौ स्वैरं वैशालचैत्यं च इत्यादि ।

सू· एत्सज्ञलात्रयोदशगे चः ।

त्रयोदशादिष्वादेरचः साज्झलापरेण सहैत्वं भवति । थेरो=स्थविरः ।

(श्लो) अयस्कारो विचकिल स्त्रयस्त्रिंशत्त्वत्त्रयोदश ।
स्थविरश्च त्रयोविंशति स्त्रयोदशगो गणः ।

सू. वैकादौगः ।

एकादौ कवर्गस्य वा गः स्यात् । एकः = एगो । एओ इत्यादि ।

एकाकर्षासुगालोका कारो द्योतकरामुकाः ।
श्रावकोऽथो तीर्थंकर एकादिगण इष्यते ॥

सू. टोर्बडिशादौ लः ।

बडिशादौ टवर्गस्य लत्वं वा स्यात् । बलिसम्, बडिसम् = बडिशम् । बडिश ।डनडचपेटापीडावाडी (वाटी) च वेणुश्च । दाडिम इह पाटयतिर्णिजन्त एव प्रगृह्यते नान्यः ।

सू. लल्डोऽनुडगे ।

असंयुक्तस्यानादौ वर्तमानस्य अचः परस्य डस्य लत्व लिद्भवति । उड्वादीन्वर्जयित्वा । गरुडः = गलुलो । उडुगौडनिबिडनाडीपीडितनीडा इहोड्वादिः ।

सू. प्रतिगेऽप्रतीपगे ।

प्रत्यादिषु तवर्गस्य डो भवति । अप्रतीपगे । प्रतिपन्नः = पडिवण्णो । प्रतीपम् = पईवम् । प्रतिपन्नः प्रतिभासः प्रति-ह्वारः प्रतिनिवृत्तकन्दरिके ।

(श्लो) प्रतिपत्प्रतिमाप्रभृतिः सह प्रतिस्पर्धिना प्रतिकरोतिः ।
प्रतिशृन्मृतकं चैव भिण्डिवालो हरीतकी ।
पताकाप्राभृतविभीतकाव्यापृत इत्यमी ॥
प्रत्यादयस्तु विज्ञेयाः प्रतीपादिरथोच्यते ।
प्रतीपं च प्रतिष्ठानं प्रतिज्ञानं च सम्प्रति ॥
प्रतिष्ठा च प्रतिसमयं प्रतिज्ञा च कीर्तितः ।

सू· रलसप्तत्यादौ ।

सप्तत्यादौ तवर्गस्य रत्वं लिद्भवति । सत्तरी=सप्ततिः । सप्तत्यादि. सप्ततिसप्तदशैकादशत्रयोदश च । द्वादश-पञ्चदशाष्टादशगद्गद इत्ययं हि गणः ।

सू· हरिद्रादौ ।

रस्य लत्वं स्यात् । हरिद्रा=हलद्दी ।

(श्लो) हरिद्राङ्गारचरणसुकुमारयुधिष्ठिराः ।
सत्कारमुखरौरुग्णः करुणो वरुणस्तथा ।

परिखासंवत्सरमत्सरपरशुकिरातशिथिरदारिद्रयम् । कातर-परिघदरिद्रापद्मारागरुडपारि भद्रं च । दरिद्राति-श्चात्र पादार्थ एव चरणो गणे । पठ्यतेऽथ किरातस्तु चत्व-संयोग एव हि ।

सू· क्ष्वेडकगे खल् ।

क्ष्वेडकादिषु संयुक्तस्य ख स्यात् । लित्वान्नित्यम् । क्ष्वेडकः=खेडओ । क्ष्वेडकः स्फोटकः तद्वत्स्फेटकश्चेद्गू-ह्यतम्

सू· स्पृहादौ ।

स्पृहादिषु संयुक्तस्य छो भवति । स्पृहा-छिहा । इक्षुक्षीर-क्षारक्षुश्च ।

(श्लो) लक्ष्माक्षिस्थगितं क्षत्रं क्षतं कौक्षेयकस्तथा ।
सादृश्यं च क्षुधा लक्ष्मी स्पृहादिगण इष्यते ।

सू. रस्याधूर्तादौटः ।

व्याख्यातम् । धूर्तः कीर्तितमौहूर्तिकवार्तिकवर्तिकाः कीर्तिः । कार्तिकवार्तामार्तावार्तायां वेति वाच्यमित्याहुः ।

समाविनिर्निप्रयुतो वर्तनं वर्तकस्तथा ।
वार्तिकं चोत्कर्तितश्च धूर्तादिगण ईरितः ॥

सू· प्रमुक्तगे ।

प्रमुक्तादिषु समासे यथादर्शनं व्यञ्जनस्य द्वित्वं वा स्यात् । पम्मुक्को, पमुक्को=प्रमुक्तः ।

त्रैलोक्यं बद्धफलप्रमुक्तसपिपासशिखरखण्डपरवशाः ।
प्रतिकूलसपरिहासादर्शनमुत्पलपलाशकसपरितापौ ।
प्रफुल्लमेषु द्वितीयपदादेर्द्वित्वमिष्यते ।

सू· दैवगे खौ ।

दैवादिष्वनादेर्यथादर्शनं व्यञ्जनस्य द्वित्वं वा स्यात् । देव्वम् = दैवम् । दैवव्याकुलमूकव्याहृतनिहितैककुतूहल-नडेषु । तूष्णीकनीडसेवास्थाणु नखस्त्यनहूतेषु । दैवे मृदु-केऽन्त्यऽन्त्यस्य ह्यथास्मदीये तु कस्यैव । स्थूले लस्यैव स एवेत्यत्र तु चस्य हि द्वित्वम् ।

सू, तैलादौ ।

तैलादिषु यथादर्शनमन्त्यस्यानन्त्यस्य वा व्यञ्जनस्य द्वित्वं भवति नित्यम् ।

तेल्लम्=तैलम् । तैलव्रीडाविचकिलप्रभृतेषु ऋजौ द्विता ।

(श्लो) मण्डूके स्रोतसि प्रेम्णि स्यादन्त्यस्यैव यौवने ।
वस्यैवोलूखस्यैवेष्टा तैलादिके गणे ।

स्याद्भव्यचैत्यचौर्यसमेयात् । एषु चौर्यादिषु च यात्प्रागित्वं भवति । स्वाद्वाद:=सिआवाओ । भव्यः=भविवो । चैत्यम्=चेइअम् । चौर्यम् =चोरिअम् । गाम्भीर्यधैर्यभार्या-

सौन्दर्यब्रह्मचर्यवीर्याणि । चर्चाचार्यश्शौर्यं वर्यस्थैर्ये च सूर्य-पर्यङ्कौ । चौर्यसमा विज्ञेयाः पर्यङ्के वा भवेदित्वम् ।

सू. लादक्लीबेषु ।

सयुक्तस्य लात्प्रागित्वं स्यात् । क्लीबादीन्वर्जयित्वा । क्लिष्ट=किलिट्ठम् । क्लीबः क्लमोऽपि क्लबश्च शुक्लपक्षो ऽल्लवाः । किञ्च प्लावयतिश्चैतादृशाः क्लीबादयः स्मृताः ।

सू. तन्व्याभे ।

तन्वी प्रभृतिषु सयुक्तस्यान्त्यहलः प्रागत्वं भवति । तन्वी= तणुई । तन्वी-लघ्वी गुर्वी बह्वी मृद्वी च पट्वी च । तन्व्याभा विज्ञेयाः पृथ्व्यां वैकल्पिकं चोत्वम् ।

सू. विंशतिषुत्याद्लोपल् ।

विंशत्यादिषु तीत्यत यवेन सह बिन्दोर्लोपः स्यात् । शित्वा-त्पूर्वस्य दीर्घः । विंशतिः=वीसा ।

त्रयोविंशत्तथात्रिंशद्द्वात्रिंशद्विशते स्त्रियाम् ।
सिंहे वैकल्पिको लोपो गणे दंष्ट्रा च गृह्यते ॥

सू. शकगे ।

व्याख्यातम् ।

(श्लो) शकिर्मृगिर्लगिसिचोअटतिर्लुटति स्तृटिः ।
कृपिजिमिस्तविश्चेति शकादिगण ईरितः ॥

सू. अरिवृषाम् ।

व्याख्यातम् । वृषिर्मृषिस्तृषिहृषी इत्यादि स्यादयं गणः ।

सू. रुषगेचोदिः ।

व्याख्यातम् । "रुषिश्शुषिर्दुषितुषीषुषिशिषिरितीदृशः ।" अस्मिन् शास्त्रे सर्वेऽप्याकृतिगणाः ।

इति प्राकृतशब्दप्रदीपिकायां गणप्रकरणम् ।

कल्यान्ववाय वाराशि सुधांशोः सूरसूरिणः ।
तनयः कानकान्फल्लीमावसन्योऽभिवर्धते ॥ 1 ॥

तं शिष्यं नरसिंहं प्राकृतशब्दप्रदीपिकामेनां ।
मोदादकारयन्मां ताताचार्यो बुधप्रीत्यै ॥ 2 ॥

इत्थं प्राकृतशब्दानां षण्णां प्रादर्शि सूक्ष्मतः ।
पदव्येतां बुधवराः प्रेक्ष्य तुष्यन्तु सादरम् ॥ 3 ॥

प्राकृतसंस्कृतसरणिद्वयनिष्णातं नितान्तशान्तियुतम् ।
श्री सज्जयगुरुतनयं तिरुमलताताचार्यगुरुमहं वन्दे ॥ 4 ॥

इति प्राकृतशब्दप्रदीपिका

— — o — —